**शालेयम्** A field of rice. **–यः, –यम्** Anethum Sowa (Mar. शोपा). **–यः** A kind of radish.

**शालोत्तरीयः** An epithet of Pāṇini; see शालातुरीय.

**शाल्मलः** [ शाल्-मलच् ] 1 The silk-cotton tree. –2 One of the seven great divisions of the earth. –3 The gum of the cotton-tree. –4 N. of a ṛiṣi; V. P.

**शाल्मलिः** 1 The silk-cotton tree; आपातरम्यपुष्पश्रीशोभितः शाल्मलिर्यथा Bv. 1. 115; Ms. 8. 246. –2 One of the seven great divisions of the earth. –3 N. of a kind of hell. **–Comp. –पत्रकः** Alstonia Scholaris (Mar. सातवीण). **–स्थः** 1 an epithet of Garuḍa. –2 a vulture.

**शाल्मलिकम्** An inferior kind of Śālmali tree.

**शाल्मलिन्** *m.* N. of Garuḍa.

**शाल्मलिनी** The silk-cotton tree.

**शाल्मली** 1 The silk-cotton tree; शाल्मली शीतला स्वच्छा रसे पाके रसायनी। श्लेष्मला स्निग्धबीजा च बृंहणी रक्तपित्तजित्॥ Bhāva P. –2 N. of a river in Pātāla; लोहशङ्कुमृजीषं च पन्थानं शाल्मलीं नदीम् Ms. 4. 90. –3 A kind of hell. **–Comp. –फलकम्** a smooth board of Śālmalī wood (for washing clothes); शाल्मलीफलके श्लक्ष्णे नेनिज्यान्नेजकः शनैः Ms. 8. 396. **–वेष्टः,–वेष्टकः** the gum of the silk-cotton tree.

**शाल्वः** 1 N. of a country. –2 A king of Śālva.

**शाल्वणम्** A poultice, cataplasm.

**शाव** *a.* ( –वी *f.* ) [ शव-अण् ] 1 Relating to a dead body; caused by the death (of a relative); दशाहं शावमाशौचं सपिण्डेषु विधीयते Ms. 5. 59, 61. –2 Tawny, dark-yellowish; जगाम तत्र यत्रास्या भर्तुः शावं कलेवरम् Mb. 3. 297. 62 –3 Dead. **–वः** 1 The young of any animal; a fawn, cub; क्व वयं क्व परोक्षमन्मथो मृगशावैः सममेधितो जनः Ś. 2. 18; मृगराजशावः R. 6. 3; 18. 37. –2 A dark-yellowish colour. **–वम्** Defilement caused by contact with a corpse or the death of a relative. **–वः, –वम्** A corpse; अन्यदेहविषक्तं हि शावं काष्ठत्वमागतम् Mb. 12. 153. 59.

**शावकः** The young of any animal.

**शावर** See शाबर.

**शाश** *a.* Belonging to, or coming from a hare.

**शाश्वत** *a.* (–ती *f.*) 1 [ शश्वद् भवः अण् ] 1 Eternal, perpetual, everlasting; शाश्वतीः समाः Rām. 1. 2. 15 (= U. 2. 5) 'for eternal years', 'ever more', 'for all time to come'; श्रेयसे शाश्वतो देवो वराहः परिकल्पताम् U. 5. 27 (v. l.); R. 14. 14. –2 All. **–तः** 1 N. of Śiva. –2 Of Vyāsa. –3 The sun. –4 N. of a lexicographer. **–तम्** 1 Heaven. –2 Eternity, continuity. **–तम्** *ind.* Eternally, perpetually, for ever.

**शाश्वतिक** *a.* ( –की *f.* ) Eternal, permanent, perpetual, constant; शाश्वतिको विरोधः 'natural antipathy'; शाश्वतिकं विरोधमपहाय K.

**शाश्वती** The earth.

**शाष्कुल** *a.* (–ली *f.*) Eating flesh (or fish).

**शाष्कुलिकम्** A quantity of baked cakes (शष्कुली).

**शास्** 2 P. (शास्ति, शशास, अशिषत्, शासिष्यति, शासितुम्, शिष्ट) 1 To teach, instruct, train (govering two accusatives in this sense); माणवकं धर्मं शास्ति Sk.; Bk. 6. 10; शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् Bg. 2. 7. –2 To rule, govern; अनन्यशासनामुर्वीं शशासैकपुरीमिव R. 1. 30; 10. 1; 14. 85; 19. 57; Ś. 1. 25; Bk. 3. 53. –3 To order, command, direct, enjoin; इति रामो वृषस्यन्तीं वृषस्कन्धः शशास ताम् R. 12. 34; त्वामागतः शासितुम् Mv. 6. 20; Ku. 6. 24; Bk. 9. 68. –4 To tell, communicate, inform (with dat.); तस्मिन्नायोधनं वृत्तं लक्ष्मणायाशिषन्महत् Bk. 6. 27; Ms. 11. 83. –5 To advise; स किंसखा साधु न शास्ति योऽधिपम् Ki. 1.5. –6 To decree, enact. –7 To punish, chastise, correct; तान् शिष्याच्चौरदण्डेन धार्मिकः पृथिवीपतिः Ms. 8. 29; 4. 175; V. 5. –8 To tame, subdue; सौमित्रेश्चरणौ न चेत्तदिषुभिः शासिष्यसे दुर्मदः Mv. 6. 20. –9 To wish, desire.

**शास्** *m.* A reciter; as in उक्थशास्.

**शासः** Ved. 1 An order, command. –2 Praise (स्तुति).

**शासकः** [ शास्-ण्वुल् ] 1 A ruler. –2 A chastiser, punisher.

**शासन** *a.* 1 Teaching, instructing; इति मे न तु बोधाय कल्पते शासनं वचः Bhāg. 1. 8. 50. –2 Punishing, chastising. **–नम्** [ शास्-ल्युट् ] 1 Instruction, teaching, discipline. –2 Rule, sway, government; अनन्यशासनामुर्वीम् R. 1. 30; so अप्रतिशासन. –3 An order, a command, direction; तरुभिरपि देवस्य शासनं प्रमाणीकृतम् Ś. 6; R. 3. 69; 14. 83. 18. 28. –4 An edict, enactment, a decree. –5 A precept, rule. –6 A royal grant (of land &c.), charter; अहं त्वां शासनशतेन योजयिष्यामि Pt. 1; Y. 2. 240, 295. –7 A deed, writing, written agreement; शासनप्रधाना हि राजानः स्युः Kau. A. 2. 9. –8 Control of passions. –9 A written book of authority. –10 A (religious) doctrine. –11 A message. (At the end of comp. शासन often means 'punisher, destroyer, killer'; as in स्मरशासनः, पाकशासनः). **–Comp. –अतिवृत्तिः** *f.* violation of commands, disobedience. **–दूषक** *a.* disobeying a command. **–धरः** a messenger, envoy. **–पत्रम्** 1 a plate (usually of copper) on which a grant of land &c. is inscribed. –2 a sheet of paper on which an order is written. **–पराङ्मुख** *a.* disobedient to an order. **–लङ्घनम्** transgression of order. **–हरः** a royal messenger. **–हारिन्** *m.* 1 an envoy, a messenger; तमभ्यनन्दत् प्रथमं प्रबोधितः प्रजेश्वरः शासनहारिणा हरेः R. 3. 68. –2 a conveyer of royal writs.

**शासनीय** *a.* 1 To be ruled, governed or directed. –2 Punishable; V. 5.

**शासित** *p. p.* 1 Ruled, governed. –2 Punished. –3 Restrained, controlled.